
# तद्धितप्रकरणपरिचयः

अष्टाध्याय्याः तृतीयाध्यायस्य प्रथमपादे सूत्रमिदं पपाठ भगवान् पाणिनिः “प्रत्यय”[1] इति । स्वप्रकृत्यर्थं प्रत्याययति इति प्रत्ययः । अयमधिकारः आपञ्चमाध्यायान्तं व्याप्नोति । तिङ्कृत्तद्धितभेदेन बहवो हि प्रत्यया धातुभ्यः प्रातिपदिकेभ्यश्च विहिताः । तत्र धातुभ्यो विहिताः – तिङ्कृत्सनादयः । एषु सनादयः क्वचित्प्रातिपदिकेभ्योऽपि विहिताः । सुप्स्त्रीतद्धिताः प्रातिपदिकेभ्यो विहिताः प्रत्ययाः । चित्रद्वाराऽत्र स्पष्टीक्रियते -




[1] अष्टा ३.१.१

सम्पूर्णायामष्टाध्याय्यामाचार्यः पाणिनिरुत्सर्गापवादविधिं बहुधा उपायुङ्क्त । तत्रापि च बाहुल्येन इदं विज्ञानं तद्धितेष्वेवावलोक्यते । तेभ्यो लौकिकेभ्यो वैदिकेभ्यश्च शब्देभ्यो हिता इति तद्धिताः । अष्टाध्याय्याश्चतुर्थाध्यायस्य प्रथमपादे षट्सप्ततितमसूत्रत्वेन पठितोऽयं "**तद्धिताः**[2]" इत्यधिकारो ङ्याप्प्रातिपदिकात्, प्रत्ययः, परश्च इत्यधिकारत्रयान्तर्भूतः सन्नापञ्चमाध्यायपरिसमाप्ति व्याप्नोति । ङ्यन्तादाबन्तात् प्रातिपदिकाच्च परे तद्धितप्रत्यया भवन्तीत्यर्थः । अयञ्चाधिकारोऽष्टाध्याय्याः पादभागमधिकरोति । अष्टाध्याय्यां प्राय उपचतुस्सहस्रसूत्राणि भगवानपाठीत् । तत्र तेन १११५ सूत्रेषु तद्धितसूत्राण्युपनिबद्धानि । अयञ्चाधिकारः प्राधान्येन द्विधा विभक्तुं शक्यः, यस्मिन् प्रथमभागे सर्वेऽपि प्रत्यया अन्यपदार्थबोधका यथा – दशरथस्य अपत्यमित्यर्थे "अत इञ्[3]" इति सूत्रेण षष्ठ्यन्ताद्दशरथशब्दाद् इञि दाशरथिरिति रूपं सिद्ध्यति । अत्र दशरथ इति पदेन अयोध्यायाः महाराजो बुध्यते, इञि प्रत्यये सति भगवतो रामस्य बोधो जायते । एवञ्च प्रकृतौ प्रत्यये योजिते सति अन्यपदार्थस्य बोधो जायते ।

द्वितीये भागे सर्वेऽपि प्रत्ययाः स्वार्थिकाः । प्रत्ययाभावे योऽर्थः प्रकृतौ बुध्यते, स एवार्थो यत्किञ्चिद्विशेषणसहितस्तद्धितयोगे बुध्यते । तद्यथा अश्व इति प्रातिपदिकात् अज्ञातोऽश्व इत्यर्थे

[2] अष्टा ४.१.७६

[3] अष्टा ४.१.९५

"अज्ञाते[4]" इति सूत्रेण कप्रत्यये अश्वक इति रूपम् । अत्र अश्वशब्देन योऽर्थो बुध्यते स एव अश्वकशब्देनापीति विशेषः ।

भगवान् पाणिनिः प्रथमभागं प्रामुख्येन पञ्चधा आंशिशत् । ते च विभागाः पञ्च महोत्सर्गा इत्युच्यन्ते । तथाहि –

- अणधिकारः - प्राग्दीव्यतोऽण्[5] – अण् (४४ अर्थेषु)
  (उदा. अण् – औपगवः – उपगोरपत्यम् = उपगु + अण् )
- ठगधिकारः - प्राग्वहतेष्ठक्[6] - ठक् (३६ अर्थेषु)
  ( उदा. ठक् – माशब्दिकः – मा शब्दं कार्षीः इति य आह स – माशब्द + ठक्)
- यदधिकारः - प्राग्घिताद्यत्[7] - यत् (३१ अर्थेषु)
  ( उदा. यत् – रथ्यः – रथं वहति = रथ + यत् )
- छाधिकारः - प्राक्क्रीताच्छः[8] - छ (०३ अर्थेषु)
  ( उदा. छ – वत्सीयः – वत्सेभ्यो हितः = वत्स + छ )
- ठञधिकारः - प्राग्वतेष्ठञ्[9] - ठञ् (२७ अर्थेषु)
  **( उदा. ठञ् – गौपुच्छिकम् – गोपुच्छेन क्रीतम् = गोपुच्छ + ठञ् )**

---

[4] अष्टा ५.३.३०

[5] अष्टा ४.१.८३

[6] अष्टा ४.४.१

[7] अष्टा ४.४.७५

[8] अष्टा ५.१.१

[9] अष्टा ५.१.१८

## ➢ प्राग्दीव्यतोऽण् इत्यधिकारे प्रोक्ताः अर्थाः

| | |
|---|---|
| १.तस्यापत्यम् | १४.तदधीते तद्वेद |
| २.तेन रक्तं रागात् | १५.तदस्मिन्नस्तीति देशे तन्नाम्नि |
| ३.नक्षत्रेण युक्तः कालः | १६.तेन निर्वृत्तम् |
| ४.दृष्टं साम | १७.तस्य निवासः |
| ५.परिवृतो रथः | १८.अदूरभवश्च |
| ६.तत्रोद्धृतममत्रेभ्यः | १९.तत्र जातः |
| ७.संस्कृतं भक्षाः | २०कृतलब्धक्रीतकुशलाः |
| ८.सास्मिन् पौर्णमासीति संज्ञायाम् | २१.प्रायभवः |
| ९.सास्य देवता | २२.संभूते |
| १०.तस्य समूहः | २३.कालात्साधुपुष्प्यत्पच्यमानेषु |
| ११.विषयो देशे | २४.उप्ते च |
| १२.सोऽस्यादिरिति च्छन्दसः प्रगाथेषु | २५.देयमृणे |
| १३.तदस्यां प्रहरणमिति क्रीडायां णः | २६.व्याहरति मृगः |
| | २७.तदस्य सोढम् |
| | २८.तत्र भवः |

| | |
|---|---|
| २९.तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः<br>३०.तत आगतः<br>३१.प्रभवति<br>३२.तद्गच्छति पथिदूतयोः<br>३३.अभिनिष्क्रामति द्वारम्<br>३४.अधिकृत्य कृते ग्रन्थे<br>३५.सोऽस्य निवासः<br>३६.अभिजनश्च | ३७.भक्तिः<br>३८.तेन प्रोक्तम्<br>३९.तेनैकदिक्<br>४०.उपज्ञाते<br>४१.कृते ग्रन्थे<br>४२.तस्येदम्<br>४३.तस्य विकारः<br>४४.अवयवे च प्राण्योषधिवृक्षेभ्यः |

## ➢ प्राग्वहतेष्ठक् इत्यधिकारे प्रोक्ता अर्थाः

| | |
|---|---|
| १.तेन दीव्यति खनति जयति जितम्<br>२.संस्कृतम्<br>३.तरति<br>४.चरति<br>५.वेतनादिभ्यो जीवति | ६.हरत्युत्सङ्गादिभ्यः<br>७.निर्वृत्तेऽक्षद्यूतादिभ्यः<br>८.संसृष्टे<br>९.व्यञ्जनैरुपसिक्ते<br>१०.ओजःसहोम्भसा वर्तते<br>११. प्रयच्छति गर्ह्यम् |

| | |
|---|---|
| १२.उञ्छति | २४.अवक्रयः |
| १३.रक्षति | २५.तदस्य पण्यम् |
| १४.शब्ददर्दुरं करोति | २६.शिल्पम् |
| १५.पक्षिमत्स्यमृगान् हन्ति | २७.प्रहरणम् |
| १६.परिपन्थं च तिष्ठति | २८.अस्तिनास्तिदिष्टं मतिः |
| १७.माथोत्तरपदपदव्यनुपदं धावति | २९.शीलम् |
| | ३०.कर्माध्ययने वृत्तम् |
| १८.पदोत्तरपदं गृह्णाति | ३१.हितं भक्षाः |
| १९.धर्मं चरति | ३२.तदस्मै दीयते नियुक्तम् |
| २०.प्रतिपथमेति ठंश्च | ३३.तत्र नियुक्तः |
| २१.समवायान् समवैति | ३४.अध्यायिन्यदेशकालात् |
| २२.संज्ञायां ललाट्कुकुट्यौ पश्यति | ३५.कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति |
| २३.तस्य धर्म्यम् | ३६.निकटे वसति |

## ➢ प्राग्घिताद्यत् इत्यधिकारे प्रोक्ता अर्थाः

| | |
|---|---|
| १.तद्वहति रथयुगप्रासङ्गम् | १४.समानतीर्थे वासी |
| २.विध्यत्यधनुषा | १५.समानोदरे शयित ओ चोदात्तः |
| ३.धनगणं लब्धा | १६.भवे छन्दसि |
| ४.वशं गतः | १७.बर्हिषि दत्तम् |
| ५.पदमस्मिन् दृश्यम् | १८.दूतस्य भागकर्मणि |
| ६.मूलमस्याबर्हि | १९.रक्षोयातूनां हननी |
| ७.गृहपतिना सम्युक्ते ञः | २०.रेवती जगतीहविष्याभ्यः प्रशस्ये |
| ८.धर्मपथ्यर्थन्यायादनपेते | २१.असुरस्य स्वम् |
| ९.छन्दसो निर्मिते | २२.मायायामण् |
| १०.हृदयस्य प्रियः | २३.तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः |
| ११.बन्धने चर्षौ | २४.मत्वर्थे मासतन्वोः |
| १२.मतजनहलात्करणजल्पकर्षेषु | |
| १३.तत्र साधुः | |

| | |
|---|---|
| २५.पूर्वैः कृतमिनियौ च<br>२६.अद्भिः संस्कृतम्<br>२७.सहस्रेण संमितौ घः<br>२८.सोममर्हति यः | २९.मये च<br>३०.शिवशमरिष्टस्य करे<br>३१.भावे च |

## ➢ प्राक्क्रीताच्छः इत्यधिकारे प्रोक्ता अर्थाः

१. तस्मै हितम्

२. तदर्थं विकृतेः प्रकृतौ

३. तदस्य तदस्मिन् स्यादिति

## ➢ प्राग्वतेष्ठञ् इत्यधिकारे प्रोक्ताः अर्थाः

| | |
|---|---|
| १.तेन क्रीतम्<br>२.तस्य निमित्तं संयोगोत्पातौ<br>३.तस्येश्वरः<br>४.तत्र विदित इति च<br>५.तस्य वापः | ६.तदस्मिन्वृद्ध्यायलाभशुल्को-पदा दीयते<br>७.तद्धरति वहत्यावहति भाराद्वंशादिभ्यः<br>८.संभवत्यवहरति पचति<br>९.सोऽस्यांशवस्नभृतयः |

| | |
|---|---|
| १०.तदस्य परिमाणम् | १९.तेन परिजय्यलभ्यकार्य-सुकरम् |
| ११.तदर्हति | २०.तदस्य ब्रह्मचर्यम् |
| १२.पारायणतुरायणचान्द्रायणं वर्तयति | २१.तस्य च दक्षिणा यज्ञाख्येभ्यः |
| १३.संशयमापन्नः | २२.तत्र च दीयते कार्यं भववत् |
| १४.योजनं गच्छति | २३.संपादिनि |
| १५.उत्तरपथेनाहृतं च | २४.तस्मै प्रभवति सन्तापादिभ्यः |
| १६.तेन निर्वृत्तम् | २५.समयस्तदस्य प्राप्तम् |
| १७.तमधीष्टो भृतो भूतो भावी | २६.प्रकृष्टे ठञ् |
| १८.षष्टिका षष्टिरात्रेण पच्यन्ते | २७.प्रयोजनम् |

तद्धितप्रकरणं पाणिनीयव्याकरणस्य चक्रव्यूहः । एकस्मिन्नेवार्थे बहवः प्रत्ययाः , उत्सर्गस्य बहवश्चापवादाः । कौमुदीदिशा अमीषां ज्ञानं प्रक्रिया साधनं च न तथा सुकरम् । तज्ज्ञानार्थं विहङ्गवीक्षणमपेक्षितम् । अष्टाध्याय्याः परिपूर्णज्ञानेन, विहङ्गवीक्षणेन चेदं शक्यम् । तदर्थं अग्रिमपृष्ठात् चित्रितानि चित्राणि सहायकानि भवितुमर्हन्ति ।

# पाणिनीयाष्टाध्यायीमाधृत्य तद्धितान्तशब्दानां निष्पादनाय तन्त्रांशनिर्माणप्रयासः

## तद्धिताः

### प्राग्दीव्यतोऽण्

१. तस्यापत्यम्
२. तेन रक्तं रागात्
३. नक्षत्रेण युक्तः कालः
४. दृष्टं साम
५. परिवृतो रथः
६. तत्रोद्धृतममत्रेभ्यः
७. संस्कृतं भक्षाः
८. सास्मिन् पौर्णमासीति
९. सास्य देवता
१०. तस्य समूहः
(इत्यादिषु ४४ अर्थेषु)

### प्राग्वहतेष्ठक्

१. तेन दीव्यति खनति जयति जितम्
२. संस्कृतम्
३. तरति
४. चरति
५. वेतनादिभ्यो जीवति
६. हरत्युत्सङ्गादिभ्यः
७. निर्वृत्तेऽक्षद्यूतादिभ्यः
८. संसृष्टे
९. व्यञ्जनैरुपसिक्ते
१०. ओजःसहोम्भसा वर्तते
(इत्यादिषु ३६ अर्थेषु)

### प्राग्घिताद्यत्


१. तद्वहति रथयुगप्रासङ्गम्
२. विध्यत्यधनुषा
३. धनगणं लब्धा
४. वशं गतः
५. पदमस्मिन् दृश्यम्
६. मूलमस्याबर्हि
७. गृहपतिना संयुक्ते ञ्यः
८. धर्मपथ्यर्थन्यायादनपेते
९. छन्दसो निर्मिते
१०. हृदयस्य प्रियः
(इत्यादिषु ३१ अर्थेषु)

### प्राक्क्रीताच्छः

१. तस्मै हितम्
२. तदर्थं विकृतेः प्रकृतौ
३. तदस्य तदस्मिन् स्यादिति

### प्राग्वतेष्ठञ्

१. तेन क्रीतम्
२. तस्य निमित्तं संयोगोत्पातौ
३. तस्येश्वरः
४. तत्र विदित इति च
५. तस्य वापः
६. तदस्मिन् वृद्ध्याय लाभशुल्कोपदा दीयते
७. तद्धरति वहत्यावहति भाराद्वंशादिभ्यः
८. संभवत्यवहरति पचति
(इत्यादिषु २७ अर्थेषु)



प्राग्दीव्यतोऽण्
तस्यापत्यम्
अत इञ्
नडादिभ्यः फक्
हरितादिभ्यो ञः
यञिञोश्च
अनृष्यानन्तर्ये...
गर्गादिभ्यो यञ्
अश्वादिभ्यः फञ्
(इत्यादयः अपवादाः)
तेन रक्तं रागात्
लाक्षारोचनाट्ठक्
नक्षत्रेण युक्तः कालः
लुबविशेषे
द्वन्द्वाच्छः
दृष्टं साम
कलेर्ढक्
वामदेवाड्ड्यड्ड्यौ
परिवृतो रथः
पाण्डुकम्बलादिनिः
द्वैपवैयाघ्रादञ्


## प्राग्दीव्यतोऽण् इत्यस्योदाहरणानि

**औपगवः –** उपगोरपत्यमित्यर्थे ( तस्यापत्यम् ) अणि इदं रूपम् ।

**काषायम् –** काषायेण रक्तं वस्त्रमित्यर्थे ( तेन रक्तं रागात् ) अण् रूपमिदम् ।

**प्राग्दीव्यतोऽण् इत्यधिकारे अणः अपवादाः** ( उदाहरणमात्रमत्र दर्श्यते )

| प्रत्ययः | सूत्रम् | अर्थः | उदाहरणम् | विग्रहः |
|---|---|---|---|---|
| अञ् | उत्सादिभ्योऽञ् | अपत्यादिष्वर्थेषु | औत्सः | उत्सस्यापत्यम् |
| इञ् | अत इञ् | अपत्यम् | दाशरथिः | दशरथस्य अपत्यम् |
| फक् | नडादिभ्यः फक् | गोत्रापत्यम् | नाडायनः | नडस्य गोत्रापत्यम् |
| ढक् | स्त्रीभ्यो ढक् | अपत्यम् | वैनतेयः | विनताया अपत्यम् |
| ठक् | लाक्षारोचनाट्ठक् | तेन रक्तं रागात् | लाक्षिकम् | लाक्षया रक्तम् |
| छः | द्वन्द्वाच्छः | नक्षत्रेण युक्तः कालः | तिष्यपुनर्वसीयम् | तिष्यपुनर्वसूभ्यां युक्तः कालः |
| इनिः | पाण्डुकम्बलादिनिः | परिवृतो रथः | पाण्डुकम्बली | पाण्डुकम्बलेन परिवृतो रथः |


प्राग्वहतेष्ठक्
संस्कृतम्
तरति
चरति
वेतनादिभ्यो जीवति
संसृष्टे
कुलत्थकोपधादण्
गोपुच्छाट्ठञ्
नौद्व्यचष्ठन्
आकर्षात्ष्ठल्
पर्पादिभ्यः ष्ठन्
श्वगणाट्ठञ्च
वस्नक्रयविक्रयाट्ठन्
आयुधाच्छ च
चूर्णादिनिः
लवणाल्लुक्
मुद्गादण्

## प्राग्वहतेष्ठक् इत्यस्योदाहरणानि


**आक्षिकः –** अक्षैर्दीव्यति इत्यर्थे (तेन दीव्यति खनति जयति जितम् )

ठकि इदं रूपम् ।

**दाधिकम् –** दध्ना संस्कृतमित्यर्थे ( संस्कृतम् ) ठकि रूपमिदम् ।

**प्राग्वहतेष्ठक् इत्यधिकारे ठकोऽपवादाः** ( उदाहरणमात्रमत्र दर्श्यते )

| प्रत्ययः | सूत्रम् | अर्थः | उदाहरणम् | विग्रहः |
|---|---|---|---|---|
| अण् | कुलत्थकोपधादण् | संस्कृतम् | कौलत्थम् | कुलत्थैः संस्कृतम् |
| ठञ् | गोपुच्छाठञ् | तरति | गौपुच्छिकः | गोपुच्छेन तरति |
| ठन् | नौद्व्यचष्ठन् | तरति | नाविकः | नावा तरति |
| ष्ठल् | आकर्षात्ष्ठल् | चरति | आकर्षिकः | आकर्षेण चरति |
| मप् | क्त्रेर्मम्नित्यम् | निर्वृत्तः | पक्त्रिमम् | पाकेन निर्वृत्तम् |
| कक् | अपमित्ययाचिताभ्यां कक्कनौ | निर्वृत्तः | आपमित्यकम् | अपमित्य निर्वृत्तम् |


प्राग्घिताद्यत्
तद्वहति रथयुगप्रासङ्गम्
धुरो यड्ढकौ
खः सर्वधुरात्
एकधुराल्लुक्च
शकटादण्
हलसीराट्ठक्
संज्ञायां जन्या
धनगणं लब्धा
अन्नाण्णः
छन्दसो निर्मिते
उरसोऽण्च
तत्र साधुः
प्रतिजनादिभ्यः खञ्
भक्ताण्णः
परिषदो ण्यः
कथादिभ्यष्ठक्
गुडादिभ्यष्ठञ्
पथ्यतिथि..
सभाया यः
ढश्छन्दसि
भवे छन्दसि
पाथो नदीभ्यां ड्यण्
वेशन्त हिमवद्भ्यां..
स्रोतसो विभाषा..
सगर्भसयूथसनुताद्यन्
तुग्राद् घन्
अग्राद्यत्
घच्छौ च
समुद्राभ्राद् घः


## प्राग्घिताद्यत् इत्यस्योदाहरणानि -

**रथ्यः –** रथं वहति इत्यर्थे ( तद्वहति रथयुगप्रासङ्गम् ) यति इदं रूपम् ।

**पद्याः –** पदौ विध्यन्ति इत्यर्थे ( विध्यत्यधनुषा ) यति रूपमिदम् ।

**प्राग्घिताद्यत् इत्यधिकारे यतोऽपवादाः** ( उदाहरणमात्रमत्र दर्श्यते )

| प्रत्ययः | सूत्रम् | अर्थः | उदाहरणम् | विग्रहः |
|---|---|---|---|---|
| यत् | धुरो यड्ढकौ | वहति | धुर्यः | धुरं वहति |
| ढक् | धुरो यड्ढकौ | वहति | धौरेयः | धुरं वहति |
| ख | खः सर्वधुरात् | वहति | सर्वधुरीणः | सर्वधुरं वहति |
| णः | अन्नाण्णः | लब्धा | आन्नः | अन्नं लब्धा |
| खञ् | प्रतिजनादिभ्यः खञ् | साधुः | प्रातिजनीनः | प्रतिजने साधुः |
| ण्यः | परिषदो ण्यः | साधुः | पारिषद्यः | परिषदि |


प्राक्क्रीताच्छः
तस्मै हितम्
तदर्थं विकृतेः प्रकृतौ
तदस्य तदस्मिन् स्यादिति
शरीरावयवाद्यत्
खलयवमाषतिल..
अजाविभ्यां थ्यन्
आत्मन् विश्वजनभोगो..
सर्वपुरुषाभ्यां णढञौ
माणवचरकाभ्यां खञ्
छदिरुपधिबलेर्ढञ्
ऋषभोपानहोर्ञ्यः
चर्मणोऽञ्
परिखाया ढञ्

**प्राक्क्रीताच्छः इत्यस्योदाहरणानि -**


**रोगीयम् –** रोगिणे हितम् इत्यर्थे (तस्मै हितम् ) छे  इदं रूपम् ।

**अङ्गरीयाणि –** अङ्गारेभ्यः एतानीत्यर्थे ( तदर्थं विकृतेः प्रकृतौ )

छे रूपमिदम् ।

**प्राक्क्रीताच्छः इत्यधिकारे छस्यापवादाः** ( उदाहरणमात्रमत्र दर्श्यते )

| **प्रत्यय** | **सूत्रम्** | **अर्थः** | **उदाहरणम्** | **विग्रहः** |
|---|---|---|---|---|
| यत् | उगवादिभ्यो यत् | हितम् | शङ्कव्यम् | शङ्कवे हितम् |
| थ्यन् | अजाविभ्यां थ्यन् | हितम् | अजथ्या | अजेभ्यो हिताः |
| ढञ् | छदिरुपधिबलेर्ढञ् | तदर्थं प्रकृतिः | औपधेयम् | उपधये इदम् |
| ञ्यः | ऋषभोपानहोर्ञ्यः | तदर्थं प्रकृतिः | आर्षभ्यः | ऋषभाय इदम् |
| ढञ् | परिखाया ढञ् | तदस्य/तदस्मिन् | पारिखेयी भूमिः | परिखा स्यादस्याः/अस्याम् |


प्राग्वतेष्ठञ्
तमधीष्टो भृतो भूतो भावी
षष्टिकाः षष्टिरात्रेण पच्यन्ते
तत्र च दीयते कार्यं भववत्
सम्पादिनि
तस्मै प्रभवति सन्तापादिभ्यः
मासाद्वयसि यत्खञौ
द्विगोर्यप्
षण्मासाण्ण्यच्च
अवयसि ठंश्च
समायाः खः
वत्सरान्ताच्छश्छन्दसि
संपरिपूर्वात्ख च
व्युष्टादिभ्योऽण्
तेन यथाकथाचहस्ताभ्यां णयतौ
कर्मवेषाद्यत्
योगाद्यच्च
कर्मणा उकञ्

## प्राग्वतेष्ठञ् इत्यस्योदाहरणानि –

**गौपुच्छिकम् –** गोपुच्छेन क्रीतम् इत्यर्थे (तेन क्रीतम् ) ठञि इदं रूपम् ।

**सांशयिकः –** संशयमापन्न इत्यर्थे ( संशयमापन्नः ) छे रूपमिदम् ।

**प्राक्क्रीताच्छः इत्यधिकारे छस्यापवादाः** ( उदाहरणमात्रमत्र दर्श्यते )

| प्रत्ययः | सूत्रम् | अर्थः | उदाहरणम् | विग्रहः |
|---|---|---|---|---|
| यत् | मासाद्वयसि यत्खञौ | भूतः | मास्यः | मासं भूतः |
| खञ् | ” | भूतः | मासीनः | मासं भूतः |
| यप् | द्विगोर्यप् | भूतः | द्विमास्यः | द्वौ मासौ भूतः |
| खः | संपरिपूर्वात् ख च | अधीष्टादिषु | संवत्सरीणः | संवत्सरेण अधीष्टः |
| अण् | व्युष्टादिभ्योऽण् | तत्र दीयते कार्यम् | वैयुष्टम् | व्युष्टे दीयते कार्यम् वा |
| उकञ् | कर्मण उकञ् | प्रभवति | कार्मुकम् | कर्मणे प्रभवति |

एतेषु पञ्चस्वधिकारेषु असावंशोऽवलोक्यते यत् “प्राग्दीव्यतोऽण्” इत्यधिकारः “तेन दीव्यति खनति जयति जितम्[10]” इति यावद्व्याप्नोति, इदञ्च सूत्रं “प्राग्वहतेष्ठक्” इति सूत्रविहितठगधिकारे दृश्यते । कोऽत्र विशेष इति जिज्ञासायाम् इदमत्र प्राग्दीव्यतोऽण् इति सूत्रे महाभाष्यवचनानि –

**अथ प्राग्वचनं किमर्थम् ?**

**॥प्राग्वचनं सकृद्विधानार्थम्॥*॥ प्राग्वचनं क्रियते ‘सकृद्विधानार्थम्’ । सकृद्विहितः प्रत्ययो विहितो यथा स्याद्योगे योगे तस्य ग्रहणं मा कार्षमिति ॥**

**नैतदस्ति प्रयोजनम् – अधिकारादप्येतत्सिद्धम् । अधिकारः प्रतियोगं तस्याऽनिर्देशार्थ इति योगे योगे उपतिष्ठते ।**

**॥अधिकारात्सिद्धमिति चेदपवादविषयेऽणप्रसङ्गः॥*॥ अधिकारात्सिद्धमिति चेदपावादविषयेऽण् प्राप्नोति । अत इञ् । अण्चेति – अणपि प्राप्नोति ।**

**॥तस्मात्प्राग्वचनम्॥*॥ तस्मात्प्राग्वचनं कर्तव्यम् ।**

**अथ क्रियमाणेऽपि प्राग्वचने कथमिदं विज्ञायते – प्राग्दीव्यतो याः प्रकृतय इति, आहोस्वित्प्राग्दीव्यतो येऽर्था इति ?**

[10] अष्टा. ४.४.२

**किं चातः ?**

**यदि विज्ञायते 'प्राग्दीव्यतो याः प्रकृतय' इति, स एव दोषः – अपवादविषयेऽण्प्रसङ्ग इति ।**

**अथ विज्ञायते – 'प्राग्दीव्यतो येऽर्थाः' इति । न दोषो भवति, समानेऽर्थे प्रकृतिविशेषादुत्पद्यमान इञ् अणं बाधते ।-------**

**------ ।**

**किं पुनः कारणमियानवधिर्गृह्यते न 'प्राक्ठक' इत्येवोच्येत । एतदेव ज्ञापयत्यर्थेष्वयं भवतीति । किमेतस्य ज्ञापने प्रयोजनम् ? प्रकृतिविशेषादुत्पद्यमान इञ् अणं बाधते ।**[11] इति ।

✓ तद्धितेऽन्येऽधिकाराः

- कालाधिकार:
- अव्ययसंज्ञको वतिप्रत्यय:
- भावकर्मार्थिका: प्रत्यया:
- मत्वर्थीया:
- विभक्तिसंज्ञका: तद्धितप्रत्यया:
- अव्ययसंज्ञका: तद्धितप्रत्यया:
- आतिशायिकप्रकरणम्
- स्वार्थिकप्रत्यया:

[11] म. भा. ४.१.८३ पृ. १०७

- काधिकार:
- इवार्थे प्रत्यया:
- समासान्ताधिकार:

तद्धितप्रक्रियासाधने कानिचन सोपानानि सन्ति येषाम् आश्रयणेन प्रक्रियाभागः सुकरो भवति । तन्त्रांशेऽस्मिन्ननयैव शैल्या प्रक्रिया सम्पादिता वर्तते । तथाहि –

- अर्थानुसारं प्रत्ययस्य चयनम् ।
- अनुबन्धकार्यम् ।
- तद्धितान्तशब्दस्य प्रातिपदिकसञ्ज्ञा, सुपो लुक् ।
- प्रकृत्यादेश: ।
- भसञ्ज्ञाप्रयुक्तकार्याणि ।
- पदसञ्ज्ञाप्रयुक्तकार्याणि ।
- प्रत्ययादेशविचार: ।
- पुंवद्भावविचारः ।
- तद्धितान्तस्य प्रातिपदिकसञ्ज्ञायां प्रथमैकवचनरूपनिष्पादनम् ।

यानीह सोपानान्यभिहितानि तेषु प्रत्येकं यथाक्रममत्र विव्रीयते –

❖ अर्थानुसारं प्रत्ययस्य चयनम्

तद्धितप्रकरणमिदमर्थप्रधानम् । तस्मादादौ यस्मिन्नर्थे तद्धितान्तः शब्द इष्यते तस्मिन्नर्थे उत्सर्गापवादविधीन् सम्यगालोच्य सूत्रानुसारं प्रत्ययश्चेतव्यः । उदाहरणर्थम् –

दशरथ इति शब्दादपत्यार्थे उत्सर्गः अण् प्राप्नोति, तं बाधित्वा "अत इञ्" इति सूत्रेण इञ् भवति ।

- **अनुबन्धकार्यम्**

प्रत्ययचयनोत्तरं प्रत्यये विद्यमानानामनुबन्धानां निवृत्तिः कार्या । अनुबन्धत्वञ्च आचार्यकर्तृकलक्ष्यसमवायतिरिक्त-कार्यसमर्पकोच्चारणविषयत्वम् । **अनूपसर्गपूर्वकाद्बन्धधातो-र्घञ्प्रत्ययनिष्पन्नोऽनुबन्धशब्दः । अनूपसर्गोऽप्रधान्यार्थद्योतकः बध्नातिरुच्चर्णार्थिकः, तेनोक्तलक्षणं सिद्धम्**[12] ।

अनुबन्धार्थम् इत्संज्ञा प्रदेया । अत्र प्रकरणेऽपेक्षितानि इत्संज्ञाविधायकानि सूत्राणि इमानि –

- **उपदेशेऽजनुनासिक इत्**[13] – उपदेशेऽनुनासिकोऽजित्संज्ञकः स्यात् ।
- **हलन्त्यम्**[14] – उपदेशेऽन्त्यं हलित्स्यात् ।
- **षः प्रत्ययस्य**[15] – प्रत्ययस्यादिः ष इत्स्यात् ।

[12] प.शे. अनेकान्ता अनुबन्धाः पृ. ४३

[13] अष्टा. १.३.२

[14] अष्टा. १.३.३

[15] अष्टा. १.३.६

- **चुटू**[16] – प्रत्यययाद्यौ चुटू इतौ स्तः ।

इत्संज्ञा सर्वत्रापि भवति इति तु न । क्वचित्तन्निषेधोऽप्यस्ति । तद्यथा –

**न विभक्तौ तुस्माः**[17] – विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः ।

अत्रायं संशयः स्यात् यद्विभक्तिसंज्ञा सुपां तिङाञ्च विहिता "विभक्तिश्च[18]" इति सूत्रेण । तद्धितेऽस्योपयोगः कथम् ? तद्धितप्रकरणे पञ्चमाध्यायस्य तृतीयपादे सूत्रमिदं पठ्यते "प्राग्दिशो विभक्तिः[19]" इति । इत ऊर्ध्वं "था हेतौ च च्छन्दसि[20]" इति सूत्रपर्यन्तमयमधिकारो वर्तते । अर्थादस्मिन्नधिकारे ये प्रत्ययाः पठितास्ते सर्वेऽपि विभक्तिसंज्ञका भवन्ति । ते च प्रत्ययाः यथा –

तसिल्, त्रल्, ह, अत्, दा, र्हिल्, अधुना, दानीम्, द्य, द्यस्, उत्, आरि, द्यु, समसण्, एद्यवि, थाल्, थमु, था ।

अमीष्वपि तवर्गसकारमकारा इतो न भवन्ति ।

---

[16] अष्टा. १.३.७

[17] अष्टा. १.३.४

[18] अष्टा. १.४.१०४

[19] अष्टा. ५.३.१

[20] अष्टा. ५.३.२६

❖ तद्धितान्तशब्दस्य प्रातिपदिकसंज्ञा, सुपो लुक्

दशरथस्यापत्यमित्यर्थे अत इञ् इति सूत्रेण इञि कृते दशरथ ङस् इञ् इति स्थिते प्रातिपदिकसंज्ञा विधेया । विधायकं सूत्रं भवति –

**कृत्तद्धितसमासाश्च**[21] इति । अस्यार्थः – कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः ।

एवं सर्वत्राप्यस्मिन्प्रकरणे प्रक्रियावसरे इयं संज्ञा कर्तव्या ।

तदुत्तरं सुपो लुक्कर्तव्यम् । लुग्विधायकं सूत्रं भवति –

सुपो धातुप्रातिपदिकयोः – एतयोरवयवस्य सुपो लुक् स्यात् ।

❖ **प्रकृत्यादेशाः**

प्रातिपदिकसज्ञायां सुपो लुकि च यदि प्रत्ययमाश्रित्य प्रकृतेः कश्चन आदेशो विहितो वर्तते तर्हि तत्कार्यं कर्तव्यम् । तानि च कार्याणि यथा –

**तद्धितेष्वचामादेः**[22] – ञिति णिति च तद्धिते परे अचामादेर्वृद्धिः स्यात् ।

**किति च**[23] – किति परे अचामादेर्वृद्धिः स्यात् ।

[21] अष्टा. १.२.४६

[22] अष्टा. ७.२.११७

[23] अष्टा. ७.२.११८

### ❖ भसञ्ज्ञाप्रयुक्तकार्याणि

भसंज्ञाप्रयुक्तकार्यार्थमादौ भसंज्ञा कस्य भवतीति ज्ञानमपेक्षितम् । भसंज्ञासूत्राणि प्रथमाध्यायस्य चतुर्थपादे पठ्यन्ते । तानि यथा –

**यचि भम्**[24] – यकारादिषु अजादिषु कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात् ।

**तसौ मत्वर्थे**[25] – तान्तसान्तौ भसंज्ञौ स्तो मत्वर्थे परे ।

भसंज्ञायां सत्यां कर्तव्यानि कार्याणि –

- **यस्येति च**[26] – भस्येवर्णोवर्णयोर्लोपः स्यादीकारे तद्धिते च परे ।
- **टेः**[27] – भस्याङ्गस्य टेर्लोपः स्यात् डिति ।
- **नस्तद्धिते**[28] – नान्तस्य भस्य टेर्लोपः स्यात्तद्धिते ।
- **ओर्गुणः**[29] – उवर्णन्तस्य भस्य गुणः स्यात्तद्धिते ।
- अन्यान्यपि यथा – पादः पत्, वसोः सम्प्रसारणम्, अचः, उद ईत्, ति विंशतेर्डिति, अह्नष्टखोरेव, ढे

[24] अष्टा. १.४.१८

[25] अष्टा. १.४.१९

[26] अष्टा. ६.४.१४८

[27] अष्टा. ६.४.१४३

[28] अष्टा. ६.४.१४४

[29] अष्टा. ६.४.१४६

लोपोऽकद्र्वाः, सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः, हलस्तद्धितस्य, आपत्यस्य च तद्धितेऽनाति, क्यच्व्योश्च, बिल्वादिभ्यश्छस्य लुक्, न भकुर्छुराम् इत्यादीनि ।

❖ **पदसंज्ञाप्रयुक्तकार्याणि**

तत्रादौ पदसंज्ञाविधायकानि सूत्राणि -

- **सुप्तिङन्तं पदम्**[30] – सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।
- **सिति च**[31] – सिति परे पूर्वं पदसंज्ञं स्यात् ।
- **स्वादिष्वसर्वनामस्थाने**[32] – कप्प्रत्ययावधिषु स्वादिष्व-सर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात् ।

पदसंज्ञाप्रयुक्तानि कार्याणि

- **नलोपः प्रातिपदिकान्तस्य**[33] – प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात् ।
- **झलां जशोऽन्ते**[34] – पदान्ते झलां जशः स्युः ।

[30] अष्टा. १.४.१४

[31] अष्टा. १.४.१६

[32] अष्टा. १.४.१७

[33] अष्टा. ८.२.७

[34] अष्टा. ८.४.३९

- **ससजुषो रुः**[35] – सस्य सजुष् शब्दस्य च रुः स्यात् पदान्ते।
- **खरवसानयोर्विसर्जनीयः**[36] – खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते।
- **चोः कुः**[37] - चवर्गस्य कवर्गः स्याज्झलि पदन्ते।

❖ **प्रत्ययादेशाः**

- आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्[38]– प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः। तद्यथा –

  फ् – आयन्

  ढ् – एय्

  ख् – ईन्

  ख्– ईय्

  घ् - इय्
- **युवोरनाकौ** (७/१/१) – यु, वु एतयोरनुनासिकयोः क्रमात् अन अक एतावादेशौ स्तः।

---

[35] अष्टा. ८.२.६६

[36] अष्टा. ८.३.१५

[37] अष्टा. ८.३.३०

[38] अष्टा. ७.१.२

- **ठस्येकः** (७/३/५०) – अङ्गात्परस्य ठस्येकादेशः स्यात् ।
- **इसुसुक्तान्तात् कः** (७/३/५१) – इस्, उस्, उक्, त एतदन्तात्परस्य ठस्य कः स्यात् ।

❖ **पुंवद्भावविचारः**

- तसिलादिषु एकादशसु प्रत्ययेषु परतो भाषितपुंस्कस्य स्त्रीलिङ्गस्य पुंवद्भावो भवति ।
- ठक् छस् इत्येतयोः प्रत्यययोः परयोः ठक्छसोश्च पुंवद्भावो वक्तव्यः इति वार्त्तिकेन भाषितपुंस्कस्य स्त्रीलिङ्गस्य पुंवद्भावो भवति ।
- भस्याढे तद्धिते पुंवद्भावो वक्तव्य इति वार्त्तिकेनापि पुंवद्भावो भवति । यथा हस्तिनी + ठक् हस्तिन् + इक = हास्तिकम् ।

❖ तद्धितान्तस्य प्रातिपदिकसञ्ज्ञायां प्रथमैकवचनरूपनिष्पादनम्

- प्रातिपदिकसंज्ञासूत्रम् – कृत्तद्धितसमासाश्च ।
- प्रथमैकवचनरूपनिष्पादनं शब्दाधिकारोक्तप्रक्रियानुसारं कर्तव्यम् ।

एवं सङ्क्षेपेणात्र तद्धितप्रकरणस्य परिचयो विहितः ।